पिड़का, स्त्री, (पीड़यतीति । पीड़ + ण्वुल् + टाप् । निपातनात् साधुः । ) स्फोटकविशेषः । प्रमेहजा सा दशविधा । यथा,—

"शराविका कच्छपिका जालिनी विनतालजी ।
मसूरिका सर्षपिका पुत्रिणी च विदारिका ।
विद्रधिश्चेति पिड़काः प्रमेहोपेक्षया दश ॥"

तासां प्रत्येकलक्षणं यथा,—

"सन्धिमर्म्मसु जायन्ते मांसलेषु च धामसु ।
अन्तोन्नता च तद्रूपा निम्नमध्या शराविका ॥१॥
सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः ।२।
जालिनी तीव्रदाहार्त्तिर्मांसजालसमावृता ॥३॥
अवगाढ़रुजा क्लेदा पृष्ठे वाप्युदरेऽपि वा ।
महती पिड़का नीला विनता नाम सा स्मृता ॥४॥
रक्तासिता स्फोटचिता दारुणा त्वलजी भवेत् ।५।
मसूरफलसंस्थाना विज्ञेया सा मसूरिका ॥ ६ ॥
गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी । ७ ।
महत्यल्पचिता ज्ञेया पिड़का चापि पुत्रिणी ॥८॥
विदारी कन्दवद्वृत्ता कठिना च विदारिका ।९।
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा ॥"१०॥

कुष्ठपिड़का यथा,—

"कण्डूर्विपूयकश्चैव कुष्ठे शोणितसंश्रिते ।
बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिड़कोद्गमः ॥" * ॥

पिड़काविशेषो यथा,—

"यवाकारा सुकठिना ग्रथिता मांससंश्रिता ।
पिड़का श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥
घनामवक्त्रां पिड़कामुन्नतां परिमण्डलाम् ।
अल्पालजीमल्पपूयां तां विद्यात् कफवातजाम् ॥१
विवृतास्यां महादाहां पक्वोडुम्बरसन्निभाम् ।
परिमण्डलां पित्तकृतां विवृतां नाम तां विदुः ॥२॥
ग्रथिताः पञ्च वा षड् वा दारुणाः कच्छपोपमाः ।
कफानिलाभ्यां पिड़का ज्ञेयाः कच्छपिका बुधैः ॥ ३ ॥

ग्रीवांसकक्षाकरपाददेशे
सन्धौ गले वा त्रिभिरेव दोषैः ।
ग्रन्थिः सवल्मीकवदक्रियाणां
जातः क्रमेणैव गतः प्रवृद्धिम् ॥
मुखैरनेकैः सुतितोदवद्भि-
र्विसर्पवत् सर्पति चोन्नताग्रैः ।
वल्मीकमाहुर्भिषजो विकारं
निष्प्रत्यनीकं चिरजं विशेषात् ॥ ४ ॥

पद्मकर्णिकवन्मध्ये पिड़काभिः समाचिताम् ।
इन्द्रवृद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक् ॥५॥
मण्डलं वृत्तमुत्सन्नं सरक्तं पिड़काचितम् ।
रुजाकरीं गर्द्दभिकां तां विद्याद्वातपित्तजाम् ॥ ६ ॥
वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः ।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः ॥ ७ ॥
कर्णस्याभ्यन्तरे जातां पिड़कामुग्रवेदनाम् ।
स्थिरां पनसिकान्तान्तु विद्यादन्तःप्रपाकिणीम् ॥ ८ ॥
विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् ।
दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्दभः ॥९॥
पिड़कामुत्तमाङ्गस्थां वृत्तामत्युग्ररुग्ज्वराम् ।
सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिवेल्लिकाम् ॥ १० ॥
बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम् ।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्द्दिशेत् ॥११॥
एकामेतादृशीं दृष्ट्वा पिड़कां स्फोटसन्निभाम् ।
त्वग्गतां पित्तकोपेन गन्धनामां प्रचक्षते ॥१२॥
कक्षभागेषु ये स्फोटा जायन्ते मांसदारुणाः ।
अन्तर्द्दाहज्वरकरा दीप्तपावकसन्निभाः ॥
सप्ताहाद्वा दशाहाद्वा पक्षाद्वा घ्नन्ति मानवम् ।
तामग्निरोहिणीं विद्यादसाध्यां सन्निपाततः ॥१३॥
नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम् ।
कुरुते दाहपाकौ च व्याधिन्तं चिप्यमादिशेत् ॥
तदेवाल्पतरैर्द्दोषैः कुनखं परुषं वदेत् ॥१४॥
गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम् ।
पादस्यानुशयीं तान्तु विद्यादन्तःप्रपाकिणीम् ॥१५
विदारीकन्दवद्वृत्तां कक्षावङ्क्षणसन्धिषु ।
विदारीति च तां विद्यात् सर्व्वजां सर्व्वलक्षणाम् ॥"१६॥

इति माधवकरः ॥

पिण्डं, क्ली, पुं, ( पिण्डते संहतो भवतीति । पिडि संहतौ + अच् । पिण्ड्यते राशीक्रियते इति । कर्म्मणि घञ् वा । ) आजीवनम् । अयः । इति मेदिनी । डे, १६ ॥ श्राद्धशेषद्रव्यनिर्म्मितबिल्वफलाकारपित्रादेश्यकदेयान्नम् । यजुर्व्वेदिनां पिण्डशब्दो नपुंसकलिङ्गेन प्रयुज्यते । यथा,— "अवनिक्तं पिण्डं दद्यादसावेतत्त इति श्राद्धविवेकधृतपिण्डपितृयज्ञीयकात्यायनवचने पिण्डविशेषणे एतदिति नपुंसकनिर्द्देशात् भाषेतेतच्च वै पिण्डं यन्नदत्तस्य पूरकमिति ऋष्यशृङ्गवचनेऽपि तथा दर्शनाच्च । छन्दोगानां पिण्डशब्दः पुंलिङ्गेन प्रयुज्यते । दर्भेषु मधु मधु मध्वित्यत्र ऋमी मदन्त इति जपित्वा त्रींस्त्रीन् पिण्डान् दद्यादिति गोभिलसूत्रे पिण्डानिति पुंलिङ्गनिर्द्देशात् ।" इति श्राद्धतत्त्वम् ॥ * ॥ गयादावात्मपिण्डदानविधिर्यथा,—

"गयान्तं पिण्डदानञ्च गयान्तं तीर्थमेव च ,
पञ्चकान्तं कामरूपं पिप्पिलान्तं सरित् शुभे ॥
जनार्द्दनस्य हस्ते तु पिण्डं दद्यात् स्वकं नरः ।
विरजे च तथा चाम्बकर्णे रामे च सोमके ॥
जीवत्पिण्डप्रदानेन अल्पायुर्जायते नरः ।
यत्रागम्य महाक्षेत्र स्वकं पिण्डं ददेत्तु यः ।
मासद्वयाधिकं वर्षमायुषो वर्द्धते क्रमात् ॥"

इति योगिनीतन्त्रे प्रथमतमे २ भागे ५ पटलः ॥ अन्यत् गयाशब्दे द्रष्टव्यम् ॥

पिण्डः, पुं, ( पिडि संहतौ + अच् । ) बोलः । ( अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"विद्वान् गोलः पिण्डकश्च पिण्डो बोलो रसोरसः ॥)
बलम् । सान्द्रम् । देहैकदेशः । ( यथा, महाभारते । ३ । ११२ । ३ ।

"द्वौ चास्य पिण्डावधरेण कण्ठा-
दजातरोमौ सुमनोहरौ च ॥" )

अगारैकदेशः । देहमात्रम् । ( यथा, रघुः । २ । ५७ ।

"एकान्तविध्वंसिषु मद्विधानां
पिण्डेष्वनास्था खलु भौतिकेषु ॥" )

निवापः । ( यथा, मनुः । ३ । २१५ ।
"त्रींस्तु तस्माद्धविःशेषात् पिण्डान् कृत्वा समाहितः ।
औदकेनैव विधिना निर्व्वपेद्दक्षिणामुखः ॥" )
गोलः । सिह्लकः । ओड्रपुष्पम् । इति मेदिनी । डे, १६ ॥ इन्दम् । कवलः । इति हेमचन्द्रः ॥ ( यथा, मनुः । ११ । २१७ ।
"एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ॥")
गजकुम्भः । इत्यमरः । २।८।३७॥ मदनवृक्षः । इति राजनिर्घण्टः ॥ ( यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"मदनश्छर्द्दनः पिण्डो नटः पिण्डीतकस्तथा ।
करहाटो मरुवकः शल्यको विषपुष्पकः ॥"
किलाटः । यथा, वैद्यकरत्नमालायाम् ।
"किलाटः कूर्चिका पिण्डः ———— ॥")
निवापस्य पितृदेयस्य विधिर्यथा,—

"यावदन्नमुपादाय हविषोऽर्भकमर्भकम् ।
चरुणा सह सन्नीय पिण्डदानमुपक्रमेत् ॥

श्राद्धार्थाद्धविषोऽन्नादेः सकाशात् यावद्भक्ष्यमोदनव्यञ्जनादि ततोऽल्पाल्पं गृहीत्वा चरुमौ करणशेषेण सह सन्नीय मिश्रीकृत्य पिण्डदानमारभेतेत्यर्थः ।

मध्वाज्यतिलसंयुक्तं सर्व्वव्यञ्जनसंयुतम् ।
उष्णमादाय पिण्डन्तु कृत्वा विल्वफलोपमम् ।
दद्यात् पितामहादिभ्यो दर्भमूलाद्यथाक्रमम् ॥

अत्र पितामहपदं पितृपरं वचनान्तरैकवाक्यत्वात् ।

सपित्रे प्रथमं पिण्डं दद्यादुच्छिष्टसन्निधौ ।
पितामहाय चैवाथ तत्पित्रे च ततः परम् ॥
दर्भमूले लेपभुजस्तर्पयेल्लेपघर्षणैः ।
पिण्डैर्मातामहांस्तद्वद्गन्धमाल्यादिसंयुतैः ॥
पीणयित्वा द्विजाग्र्याणां दद्यादाचमनन्ततः ॥"

इति श्राद्धतत्त्वम् ॥ * ॥

अन्नाद्यभावे फलादिनापि तस्य कर्त्तव्यत्वं यथा,—

"ऐङ्गुदं बदरीमिश्रं पिण्याकं दर्भसंस्तरे ।
न्युप्य पिण्डं ततो राम इदं वचनमब्रवीत् ॥
इदं भुङ्क्ष्व महाराज । प्रीतो यदशना वयम् ।
यदन्नाः पुरुषा राजंस्तदन्नाः पितृदेवताः ॥"

इत्ययोध्याकाण्डम् ॥ * ॥

पूरकपिण्डविधिर्यथा,—

"ततश्चोत्तरपूर्व्वस्यामग्निं प्रज्वालयेद्द्विजः ।
तण्डुलप्रसृतिं तत्र प्रक्षाल्य त्रिः पचेत् स्वयम् ॥
सपवित्रैस्तिलैर्म्मिश्रां केशकीटविवर्जिताम् ।
दारोपान्ते ततः क्षिप्रा शुद्धां वा गौरमृत्तिकाम् ॥
तत्पृष्ठे प्रस्तरद्दर्भान् याम्याग्रान् दंशसम्भवान्